# 2021

## SANSKRIT — HONOURS

### Paper : CC-9

### (Modern Sanskrit Literature)

### Full Marks : 65

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**(Marks : 35)**

**Unit - I**

**(Marks : 05)**

1. अधोलिखितेषु कस्य***चिदेकस्य*** टीका लेखनीया। 5×1

(a) रुक्मिणीहरणम्।

(b) पाण्डवविक्रमम्।

(c) कालीपदतर्काचार्यः।

**Unit - II**

**(Marks : 30)**

2. अधोलिखितयोः कस्य***चिदेकस्य*** उत्तरं **संस्कृतभाषया देवनागरलिप्या** च देयम्। 10×1

(a) आधुनिकसंस्कृतसाहित्ये रेबाप्रसादद्विवेदीमहोदयस्यावदानं विचार्यताम्।

(b) आधुनिकसंस्कृतसाहित्ये क्षमाराओ महोदयायाः अवदानं पर्यालोच्यताम्।

3. अधोलिखितेषु ***अष्टानां*** प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरलिप्या** च संक्षेपेण देयम्। 2×8

(a) श्रीजानकीवल्लभशास्त्रिणः मातुः पितुश्च नाम लिख्यताम्।

(b) भारतवर्षस्य कस्मिन् प्रदेशे श्रीजानकीवल्लभशास्त्रिणः जन्म अभवत्? तेन रचितस्य यथेच्छम् एकस्य ग्रन्थस्य नाम लिख्यताम्।

(c) श्रीरामकरणशर्मणः जन्मस्थानं जन्मतिथिश्च लिख्येताम्।

(d) कस्य ग्रन्थस्य कृते श्रीरामकरणशर्मा साहित्य-अकादेमिपुरस्कारं लब्धवान्?

(e) श्रीजगन्नाथपाठकस्य जन्मस्थानं जन्मतिथिश्च लिख्येताम्।

(f) कस्य ग्रन्थस्य कृते श्रीजगन्नाथपाठकः साहित्य-अकादेमि पुरस्कारेण भूषितः?

(g) के. के. बिड़ला-फाउण्डेशनात् केन पुरस्कारेण श्रीजगन्नाथपाठकः पुरस्कृतः?

(h) "कापिशायिनी" "पिपासा" चेति ग्रन्थद्वयस्य रचयिता कः?

(i) श्रीशङ्करदेव-अवतारे-महोदयस्य मातुः पितुश्च नाम लिख्यताम्।

(j) श्रीशङ्करदेव-अवतारे-महोदयस्य जन्म भारतवर्षस्य कस्मिन् प्रदेशे अभवत्? तस्य जन्मतिथिरपि लेखनीयः।

(k) श्रीशङ्करदेव-अवतारे-महोदयेन रचितस्य ग्रन्थद्वयस्य नाम लिख्यताम्।

**4.** अधोलिखितेषु कस्यचित् ***एकस्य*** टीका लेखनीया। 4×1

(a) लीलाराओ-दयालः।

(b) वीरेन्द्रकुमारभट्टाचार्यः।

(c) यतीन्द्रविमलचतुर्धूरी।

**Section - B**

**(Marks : 30)**

**Unit - I**

**(Marks : 10)**

**5.** अधोलिखितयोः कस्यच***नैकस्य*** उत्तरं **संस्कृतभाषया देवनागरलिप्या** च देयम्। 10×1

(a) शिवराजविजय-नामकस्य गद्यकाव्यस्य प्रथमनिश्वासमवलम्ब्य भारतवर्षे यवनराज्यस्य प्रतिष्ठायाः विस्तारस्य च वर्णनं देयम्।

(b) पाठ्यांशानुसारतः कवेः अम्बिकादत्तव्यासस्य रचनाशैलीमवलम्ब्य नातिदीर्घः प्रबन्धः विरच्यताम्।

**Unit - II**

**(Marks : 10)**

**6.** अधोलिखितयोः कस्य***चिदेकस्य*** उत्तरं लेख्यम्। 10×1

(a) 'अथ किम्' इति नाट्यकृतौ प्रतिविम्बितः भारतवर्षस्य निर्वाचनव्यवस्थां प्रति नाट्यकारस्य कटाक्षः पर्यालोच्यताम्।

(b) पठितनाट्यकृतिमवलम्ब्य सिद्धेश्वरचट्टोपाध्यायस्य रचनाशैली पर्यालोच्यताम्।

## Unit - IV

**(Marks : 10)**

**7.** अधोलिखितयोः कस्य***चनैकस्य*** श्लोकस्य **संस्कृतभाषया देवनागरलिप्या** च सप्रसङ्गं व्याख्या कार्या। 7×1

(a) शिवः शिवापदतलगः शवोऽपि सन्
भवन्महाम्बरमपि यो निरम्बरः।
रमार्धभाक्तनुरपि मारमारकः
स वो भवो भवतु विभुर्विभूतिदः॥

(b) शिवान्वितं शशिविशदोत्तमाङ्ककं
त्रिलोचनं परिगतशास्त्रलोचनैः।
निरीक्ष्य यं नियतमनुग्रविग्रहं
जनो मनो हरविषयं न्यवीवृतत्॥

**8.** (a) कस्यचि***देकस्य*** विग्रहवाक्यं प्रदाय समासनाम लिख्यताम्। 2×1

(i) रमार्धभाक्तनुः 7(a) प्रश्ने।

(ii) शशिविशदोत्तमाङ्ककम् 7(b) प्रश्ने।

(b) कस्यचि***देकस्य*** व्युत्पत्तिः निर्णेया। 1×1

(i) निरीक्ष्य 7(b) प्रश्ने।

(ii) न्यवीवृतत् 7(b) प्रश्ने।

---